श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते षष्ठस्कन्धे

# ॥ श्री चित्रकेतु स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री चित्रकेतु स्तुतिः ॥

चित्रकेतुरुवाच

अजित जितः सममतिभिः
साधुभिर्भवान् जितात्मभिर्भवता।
विजितास्तेऽपि च भजताम्
अकामात्मनां य आत्मदोऽतिकरुणः॥ 1 ॥

तव विभवः खलु भगवन्
जगदुदयस्थितिलयादीनि।
विश्वसृजस्तेऽंशांशाः
तत्र मृषा स्पर्धन्ति पृथगभिमत्या॥ 2 ॥

परमाणुपरममहतोः
त्वमाद्यन्तान्तरवर्ती त्रयविधुरः।
आदावन्तेऽपि च सत्त्वानां
यद् ध्रुवं तदेवान्तरालेऽपि॥ 3 ॥

क्षित्यादिभिरेष किलावृतः
सप्तभिर्दशगुणोत्तरैराण्डकोशः।
यत्र पतत्यणुकल्पः
सहाण्डकोटिकोटिभिस्तदनन्तः॥ 4 ॥

विषयतृषो नरपशवो
य उपासते विभूतीर्न परं त्वाम्।

तेषामाशिष ईश
    तदनु विनश्यन्ति यथा राजकुलम् ॥ 5 ॥

कामधियस्त्वयि रचिता
    न परम रोहन्ति यथा करम्भबीजानि।
ज्ञानात्मन्यगुणमये
    गुणगणतोऽस्य द्वन्द्वजालानि ॥ 6 ॥

जितमजित तदा भवता
    यदाऽऽह भागवतं धर्ममनवद्यम्।
निष्किञ्चना ये मुनय
    आत्मारामा यमुपासतेऽपवर्गाय ॥ 7 ॥

विषममतिर्न यत्र नृणां
    त्वमहमिति मम तवेति च यदन्यत्र।
विषमधिया रचितो यः
    स ह्यविशुद्धः क्षयिष्णुरधर्मबहुलः ॥ 8 ॥

कः क्षेमो निजपरयोः
    कियानर्थः स्वपरद्रुहा धर्मेण।
स्वद्रोहात् तव कोपः
    परसम्पीडया च तथाधर्मः ॥ 9 ॥

न व्यभिचरति तवेक्षा
    यया ह्यभिहितो भागवतो धर्मः।
स्थिरचरसत्त्वकदम्बेषु
    अपृथग्धियो यमुपासते त्वार्याः ॥ 10 ॥

न हि भगवन्नघटितमिदं
    त्वद्दर्शनान्नृणामखिलपापक्षयः।
यन्नाम सकृच्छ्रवणात्
    पुल्कसकोऽपि विमुच्यते संसारात्॥ **11** ॥

अथ भगवन् वयमधुना
    त्वदवलोकपरिमृष्टाशयमलाः।
सुरऋषिणा यत्कथितं
    तावकेन कथमन्यथा भवति॥ **12** ॥

विदितमनन्त समस्तं
    तव जगदात्मनो जनैरिहाचरितम्।
विज्ञाप्यं परमगुरोः
    कियदिव सवितुरिव खद्योतैः॥ **13** ॥

नमस्तुभ्यं भगवते
    सकलजगत्स्थितिलयोदयेशाय।
दुरवसितात्मगतये
    कुयोगिनां भिदा परमहंसाय॥ **14** ॥

यं वै श्वसन्तमनु विश्वसृजः श्वसन्ति
    यं चेकितानमनु चित्तय उच्चकन्ति।
भूमण्डलं सर्षपायति यस्य मूर्ध्नि
    तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने॥ **15** ॥

॥ इति श्री चित्रकेतु स्तुतिः समाप्ता॥